# नारायणीयं

नारायणभट्टप्रणोतं

देशमङ्गलवार्यकृतया भक्तप्रियाख्यव्याख्यया समेतं

**संस्कृतग्रन्थ प्रकाशनकार्याध्यक्षेण**

**त. गणपतिशास्त्रिया**

**संशोधितम्।**

# विषयानुक्रमः ।

## प्रथमस्कन्धपरिच्छेदः.

१ दशके भगवन्महिमानुवर्णनम्.
२ ,, भगवद्रूपवर्णनं, भगवद्भक्त्युत्पत्त्यादिवर्णनं च.
३ ,, भक्तस्वरूपवर्णनं, भक्तिप्रार्थना च.

## अथ द्वितीयस्कन्धपरिच्छेदः.

४ ,, अष्टाङ्गयोगवर्णनं, योगसिद्धिवर्णनं च.
५ ,, विराट्पुरुषोत्पत्तिप्रकारवर्णनम्.
६ ,, विराड्देहस्य जगदात्मत्ववर्णनम्.
७ ,, हिरण्यगर्भोत्पत्तिवर्णनं, हिरण्यगर्भतपश्चरणवर्णनं, वैकुण्ठवर्णनं, भगवत्स्वरूपसाक्षात्कारवर्णनं, भगवदनुग्रहवर्णनं च.

## अथ तृतीयस्कन्धपरिच्छेदः.

८ ,, प्रलयवर्णनं, जगत्सृष्टिप्रकारवर्णनं च.
९ ,, जगत्सृष्टिप्रकारवर्णनम्.
१० ,, सृष्टिभेदवर्णनम्.
११ ,, सनकादीनां वैकुण्ठप्रवेशवर्णनं, जयविजयशापवर्णनं, हिरण्यकशिपुहिरण्याक्षोत्पत्तिवर्णनं च.
१२ ,, वराहावतारवर्णनं, भूम्युद्धरणवर्णनं च.

**कालाख्यशक्तिं प्रलयावसाने प्रबोधयेत्यादिशता *किलादौ ।**
**त्वया प्रसुप्तं परिसुप्तशक्तिव्रजेन तत्राखिलजीवधाम्ना ॥ ७ ॥**

कालेति । तत्रादौ प्रलयारम्भे परिसुप्तशक्तिव्रजेन परिसुप्तो निलीनः शक्तीनां मूलप्रकृतिमहदहङ्कारादीनां व्रजः समूहो यस्मिन्, तथाभूतेन अखिलजीवधाम्ना संसारदुःखखिन्नानां जीवानामतिचिरकालं विश्रमस्थानभूतेन कालाख्यशक्तिं प्रलयावसाने चतुर्युगसहस्रलक्षणाया रात्रेरवसाने सति त्वं मां प्रबोधयेत्यादिशता आज्ञापयता च त्वया तया कालाख्यशक्त्या सह प्रसुप्तं शक्तिशक्तिमतोरभेदमवलम्ब्य स्थितम् । यथा कश्चिद् बहुभार्यः पुरुषः इतरासु प्रसुप्तासु दयितया सह कञ्चित् कालं वसन् सुप्रबोधां तां प्रभाते त्वं मां प्रबोधयेत्यादिश्य तयैव सह गाढगाढमालिङ्ग्य सुसुखं निद्रां गच्छति, तद्वदिति भावः ॥ ७ ॥

**चतुर्युगाणां च सहस्रमेवं त्वयि प्रसुप्ते पुनरद्वितीये ।**
**कालाख्यशक्तिः प्रथमप्रबुद्धा प्राबोधयत् त्वां किल विश्वनाथ! ॥ ८ ॥**

चतुर्युगाणामिति । अद्वितीये त्वयि एवं चतुर्युगाणां सहस्रं यावत्प्रलयावसानं प्रसुप्ते सति पुनः कालाख्यशक्तिः प्रथमप्रबुद्धा हे विश्वनाथ! त्वां प्राबोधयच्च । किलशब्दोऽत्र केवलपुराणप्रसिद्धिं द्योतयति ॥ ८ ॥

**विबुध्य च त्वं जलगर्भशायिन्! विलोक्य लोकानखिलान् प्रलीनान् ।**
**तेष्वेव सूक्ष्मात्मतया निजान्तःस्थितेषु विश्वेषु ददाथ दृष्टिम् ॥ ९ ॥**

विबुध्येति । हे जलगर्भशायिन्! आवरणोदकमध्यशायिन्! त्वं प्रबुध्य अखिलान् लोकान् त्वयि प्रलीनान् विलोक्य । ननु प्रलीनानां कुतो विलोकनसम्भवस्तत्राह — तेष्विति । सूक्ष्मात्मतया कारणरूपेण निजान्तःस्थितेषु तेष्वेव विश्वेषु लोकेषु दृष्टिं ददाथ च दत्तवान् ईक्षितवानित्यर्थः ॥ ९ ॥

नाभिपद्मद्वारा प्रपञ्चसृष्टिप्रकारमाह —

**ततस्त्वदीयादयि! नाभिरन्ध्रादुदञ्चितं किञ्चन दिव्यपद्मम् ।**
**निलीननिश्शेषपदार्थमालासङ्क्षेपरूपं मुकुलायमानम् ॥ १० ॥**

---

* 'तयादौ' इति व्याख्यातृपाठः स्यात् ।